काव्यशास्त्रसम्बद्धकाव्यहेतुसमीक्षा

चिरञ्जीवी खतिवडाः

उपप्राध्यापकः, ने.सं.वि., यालनाविद्यापीठम्, मटिहानी

ckachal@gmail.com

शोधसारः

अस्मिन् लेखे काव्यहेतुविषयकानि आलङ्कारिकाणामाचार्याणां मतानि विविच्य संक्षेपेण तानि प्रस्तुतानि सन्ति। तत्र भामहेन प्रतिभा, व्युत्पतिः, अभ्यासश्चेति हेतुत्रितयमङ्गीकृतम्। तथैव दण्डी, रुद्रटः, मम्मटोऽपि काव्यहेतुत्रयं स्वीकृत्य तस्य (हेतुत्रयस्य) विमर्शं विहितवन्तः। हेमचन्द्रः, वाग्भटः, जयदेवश्चेमे त्रयोऽप्याचार्याः प्रतिभां मुख्यं हेतुं मत्वा अन्यौ द्वौ हेतू प्रतिभासहायकत्वेन स्वीकृतवन्तः। हेमचन्द्रस्य वाग्भटस्य च मतेऽपरौ हेतू प्रतिभासंस्कारत्वेन मतौ। जयदेवमते च तौ (हेतू) सहायकत्वेन निर्धारितौ। अतो वक्तुं शक्यते यदेतेषामाचार्याणां मते साक्षात्प्रतिभैव काव्यहेतुत्वं भजते। अपरयोर्व्युत्पत्त्यभ्यासयोश्च हेतुभूतप्रतिभायाः साहायकत्त्वमेव सिध्यति । आनन्दवर्धनः पण्डितराजो जगन्नाथश्च केवलां प्रतिभां तथा राजशेखरः केवलां शक्तिञ्च काव्यकारणतया मानितवन्तौ। इदमत्र ध्येयं यदाचार्यद्वारा हेतुनामोल्लेखे वैविध्यं दृष्टिगोचरं याति। रुद्रटेन मम्मटेन च प्रतिभापदस्थाने शक्तिपदं प्रयुक्तम्। सूक्ष्मपर्यालोचनेन वक्तुमिदं सुकरं यदेतेषामाचार्याणां मते शक्तिप्रतिभयोर्नास्ति भेदः केवलं राजशेखर एवेतादृश आचार्यो यन्मते शक्तिः प्रतिभया भिन्ना । काव्यहेतुविषयको वामनविचारस्तु विलक्षण एव। यत्र विलक्षणरीत्या काव्यहेतुर्विमृष्टः। वामनेन काव्यहेतुस्थाने काव्याङ्गशब्दं प्रयुज्य काव्यहेतुत्रितयं निरूपितम्। लोकः, विद्या, प्रकीर्णञ्च। लोकपदेनापेक्षितं लोकवृत्तं मम्मटादिप्रतिपादिते निपुणतादिनामके हेतौ समापतितम्। तस्य विद्याभिधानहेतुरपि तथैवाङ्गीकृतो यथाऽन्यैराचार्यैर्व्युत्पत्तिनामको हेतुरभिमतः। अनेन प्रकारेण आचार्येषु काव्यहेतुविचारविमर्षणे मतवैविध्यं दरीदृश्यत इति।

प्रमुखशब्दाः

अवधानम्, उद्भवः, निपुणता, व्युत्पत्तिः, समाधिः।

विषयपरिचयः

संस्कृतवाङ्मयं जगति प्राचीनं समृद्धञ्च मन्यते। वाङ्मयेऽस्मिन् विविधा विषया विलसन्ति। तत्र काव्यसाहित्यखण्डोऽप्यन्यतमः। संस्कृतालङ्कारशास्त्रं सम्प्रत्याविश्वमभिव्याप्य विराजते। संस्कृतालङ्कारशास्त्रीयपरम्परा नितरामुदात्ता समृद्धा प्राचीना चास्ति। एकतः संस्कृतेऽलौकिकप्रतिभामण्डितैः कविभिः

स्वालौकिककाव्यसृष्टिभिस्तस्य भाण्डागारं परिपूर्णतां नीतम्, पुनरपरतः काव्यतत्त्वमीमांसकैरलङ्कारशास्त्राचार्यैस्तस्य काव्यतत्त्वचिन्तनपरम्पराऽपि नितरां समृद्धिं प्रापिता। परम्परायामस्यां काव्यसम्बद्धसर्वविषयाणां सम्यग् विचारो जातः। काव्यतत्त्वविचारप्रसङ्गे आचार्याणां सूक्ष्मैक्षिका काव्यहेतुं प्रत्यपि समाकृष्टा। तेषां समक्षमियं समस्या सहजतः समुपस्थिता यदलौकिककाव्यनिर्मितौ कानि तत्त्वानि कारणत्वेन तिष्ठन्ति ? यद्वशाद्विनिर्मिता काव्यसर्जना सहृदयजनसरसचेतांसि समाह्लादयन्ती तन्निर्मातृकवियशांसि विस्तृते जगति विस्तारयति। प्रश्नमिमं समाधातुं संस्कृतलङ्कारशास्त्रे भामह-दण्डि-वामन-रुद्रटानन्दवर्धन-मम्मट-हेमचन्द्र-वाग्भट-पण्डितराज-राजशेखरप्रभृतिभिः संस्कृतालङ्कारशास्त्रमर्मज्ञैः सर्वाङ्गपूर्णं विवेचनं विहितम्। आचार्याणां समेषां काव्यहेतुविवेचनावलोकनेन दृष्टिपथमायाति तथ्यमिदं यदस्मिन् विषये परस्परं मतभेदोऽस्त्याचार्याणाम्। बहुभिराचार्यैर्यद्यपि काव्यहेतुत्वेन बहवो हेतवोऽङ्गीकृतास्तथापि तेषां मतानां लोचने एतत्तथ्यं निष्पद्यते यत् तात्त्विकहेतौ विकल्पो नास्ति। सामान्यतया सर्वेऽप्याचार्याः प्रतिभां स्वीकुर्वन्त्येव। व्युत्पत्त्यभ्यासादयो हेतवः कैश्चित् स्वीकृताश्चेद् कैश्चिदभिधेयान्तरेण तदेवाङ्गीकृता विलोक्यन्ते। अतः काव्यहेतुचिन्तनमतिशयगभीरं दुष्करञ्चानुमीयते। प्रकृते एत एव विषया अस्मिन्नालेखे विविच्यन्ते।

अध्ययनविधिः

अध्ययनस्यास्य निष्पादनायावश्यकसामग्रीसङ्कलनाय च विशेषरूपेण पुस्तकालयीयाध्ययनविधिरेवात्राङ्गीकृतोऽस्ति। काव्यसिद्धान्तसम्बद्धाः काव्यहेतुप्रतिपादकाश्च संस्कृतमूलग्रन्थास्तथा तत्सम्बद्धाः भाषाग्रन्थाः एवं काव्यप्रतिपादनपरिधिङ्गताः विदुषामालेखाश्च अध्यययनस्यास्य प्रमुखसामग्रीत्वेनोरीकृताः सन्ति। काव्यहेतुप्रतिपादनक्रमे तुलनाप्रतितुलनादिविधिं स्वीकृत्य सञ्चितसामग्रीणामध्ययनात् यथायथं चिन्तनमनननिदिध्यासनादिविधयश्च स्वायत्तीकृताः सन्ति। क्वचित् गभीरविषयविचारसरणौ स्वोपज्ञपद्धतिश्चावलम्बिता वर्तते।

अध्ययनस्य प्रमुखाः समस्याः

काव्यहेतुचिन्तनं बहुभिर्विद्वद्भिर्विहितमस्ति। काव्यहेतुविषयेऽपि विचारकाणां चिन्तकानां चिन्तनं नास्ति न्यूनम्। एवमेव साहित्यसम्बद्धकाव्यहेतुविचारविमर्षणेऽसंख्यसंख्यावन्तः सन्ति विचारवन्तः। परन्तु काव्यहेतुत्वेन कानि कानि तत्त्वानि कैस्कैः स्वीकृतानि ? केषां केषां तत्त्वानां प्राधान्यम् ? केषाञ्च गौणत्वमिति जिज्ञासा एव प्रस्तोष्यमाणस्याध्ययनस्य प्रमुखा समस्या विद्यते। सूत्रात्मकरूपेण विचार्यमाणे आलेखस्यास्य वक्ष्यमाणसमस्या दृष्टिगोचरीभवति। यथा–

क) आचार्याणां मतानुसारं काव्यहेतुः कः ? इति।

अध्ययनस्योद्देश्यम्

पौरस्त्यसाहित्ये बहुभिराचार्यैः काव्यहेतुश्चिन्तितः। तेषां मतानामध्ययनपूर्वकं काव्यहेतुसम्बन्धे प्राप्तानां सामग्रीणां अध्ययनात् काव्यहेतुनिर्धारणमेवालेखस्यास्य मूलमुद्देश्यमस्ति। वस्तुतोऽध्ययनस्यास्य इदमेवोद्देश्यं जायते। यथा–

क) आचार्याणां मतानुसारं काव्यहेतुनिर्धारणम्। इति।

अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

पौरस्त्यवाङ्मयसम्बद्धः काव्यसिद्धान्त एवास्य अध्ययनस्य क्षेत्रमस्ति। काव्यहेतुसम्बन्धे प्राचीनैरर्वाचीनैश्चाचार्यैः कीदृशानि स्वाभिमतानि प्रकटितानि। तैः मिथः परमतखण्डनं स्वमतमण्डनञ्च कथं विहितम्। निष्कर्षश्च कः समायातः इत्यादिविषया अत्र समुपस्थाप्यन्ते। अतः काव्यहेतुसम्बद्धाः सर्वे विषयाः आलेखस्यास्य क्षेत्रं तथा तदतिरिक्तविषयाश्च अध्ययनस्य सीमारूपाः सन्ति।

आचार्याणां मतानुसारं काव्यहेतुचिन्तनम्

काव्यहेतुविषये पौरस्त्यवाङ्मये महती चर्चा प्राप्यते। काव्यं सुन्दरं रमणीयञ्च भवति। तत्सर्वानानन्दयति। पाठकेभ्यः श्रावकेभ्यश्च काव्यं हितमुपदिशति। एतत्सर्वं सत्त्यमस्ति। परन्तु तादृशं काव्यं कस्मात्कारणात् प्रादुर्भवति। हेतुरहितं काव्यं न कुत्राप्यवलोक्यते। काव्यमपि कार्यमस्तीति तस्यापि केनापि हेतुना अवश्यं भाव्यम्। अलङ्कारशास्त्रेष्वाचार्यैः काव्यहेतुसम्बद्धो नैजो विचारः प्रकटितः। तदनुसारमाचार्यभामहेन स्वीयकाव्यालङ्कारनाम्नि ग्रन्थे नामतः काव्यहेतुचर्चा न कृता। तेनाधस्तनासु कारिकासु काव्यनिर्माणोपादानानामुल्लेखो विहितः- *गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्। काव्यं तु जायते जातु कस्यचित् प्रतिभावतः ॥ शब्दश्छन्दोऽभिधानार्थौ इतिहासाश्रयाः कथाः। लोको युक्तिः कलाश्चेति गन्तव्या काव्यगैर्ह्यमी। शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनम्। विलोक्यान्यनिबन्धांश्च कार्यः काव्यक्रियादरः ॥* (भामहः, २०४२, पृ. २०) इति। उपर्युक्तकारिकात्रितये काव्यहेतुत्वेन प्रतिभा, व्युत्पत्तिरभ्यासश्च सङ्केतिताः। प्रथमकारिकायां 'काव्यं तु प्रतिभावतः कस्यचिद् जातु जायते' इति कथनेन तेन काव्यहेतुत्वेन प्रतिभामुक्त्वा साऽनिवार्यकाव्यकारणत्वेनाङ्गीकृता। द्वितीयकारिकायां काव्यरचनायै छन्दोव्याकरणादिशास्त्राणां लोकव्यवहारस्य कलायाश्च मननमपेक्षितं विज्ञाप्य तेन प्रकारान्तरेण व्युत्पत्तिरेवेङ्गीकृता। तृतीयकारिकायां काव्यज्ञोपासनां शब्दार्थज्ञानम् अन्यलेखकरचनाश्रयञ्च विधायैव काव्यप्रणयने प्रवृत्तिविधेयेति कथनेन तेन वस्तुतोऽभ्यासस्य सङ्केतः प्रदत्त इति वक्तुं शक्यते। दण्डी स्वकाव्यादर्शे नैसर्गिकीं प्रतिभामनेकशास्त्रकाव्यादिविमर्शजनितज्ञानं प्रगाढमभियोगञ्चैतत्त्रितयं च काव्यसम्पदः कारणत्वेन मनुते- *नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम् अमन्दश्चाभियोगोऽसौ कारणं काव्यसम्पदः ॥* (दण्डी, २०२८, पृ. ८०) इति। कारिकागतेन श्रुतेतिशब्देन व्युत्पत्तिः, अभियोगेतिपदेन चाभ्यासोऽभिप्रेत इति दण्डिवचनेनैव ज्ञातुं शक्यते। उक्तकारिकायां 'कारणम्'

इत्येकवचनप्रयोगेण वक्तुमेतच्छक्यते यद् दण्डी काव्यनिर्माणे प्रतिभादीनां सम्मिलिहेतुत्वमेवाङ्गीकुरुते। दण्डिना मतमिदमवश्यमेव ध्येयं यत् प्रतिभाया अभावेऽपि श्रुतेन (व्युत्पत्त्या), यत्नेन (अभियोगेन अभ्यासेन) च कवित्वसिद्धिः शक्या- *न विद्यते यद्यपि पूर्ववासना गुणानुबन्धिप्रतिभानमद्भुतम्। श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम् ॥* (दण्डी, २०२८, पृ. ८०) इति। दण्डिवचनेनानेन वक्तुमिदं समीचीनं यदुत्कृष्टकवित्वं निर्मातुमुक्तहेतुरपेक्ष्यते, परन्तु सहजप्रतिभामन्तरा अपरहेतुद्वितयं (श्रुतम् अभियोगञ्च) समाश्रित्यापि सामान्यकाव्यं रचयितुं शक्यमेव समुत्कृष्टं काव्यन्तु दण्डिनो विचारेऽपि प्रतिभां विना न कर्तुं शक्यते। वस्तुतो दण्डी सहजप्रतिभासम्पद्विहीनं जनमपि श्रुतेनाभियोगेन च कवित्वं कर्तुं प्रोत्साहयन्निव लक्ष्यते। वामनेन काव्यालङ्कारसूत्रे काव्यहेतुत्वं विशदं विचारितम्। तेन काव्यहेतुशब्दस्थाने काव्याङ्गशब्दः प्रयुक्तः। तन्मते त्रीणि काव्याङ्गानि सन्ति - *'लोको विद्या प्रकीर्णञ्चेति काव्याङ्गानि* (वामनः, २०२८, पृ. २५) इति। अर्थात् लोकः, विद्या, प्रकीर्णं चैतस्त्रयं काव्यहेतुत्वमुपयान्ति। लोकशब्देन स स्थावरजङ्गमात्मकलोकस्य वृत्तमपेक्ष्यते- *'लोकवृत्तं लोकः। लोकः स्थावरजङ्गमात्मा। तस्य वर्तनं वृत्तमिति"* (वामनः, २०२८, पृ. १५) इति ॥ विद्याशब्देन शब्दस्मृतिः (शब्दानुशासनम्), अभिधानकोशः (शब्दकोशः), छन्दोविचितिः (छन्दःशास्त्रम्), कलाशास्त्रम् (चतुःषष्टिकलाप्रतिपादकशास्त्रम्), कामशास्त्रम्, दण्डनीतिः (कौटिल्यरचितार्थशास्त्रं) चाभिप्रेताः – *'शब्दस्मृति-अभिधानकोश-छन्दोविचिति-कला-कामशास्त्र-दण्डनीतिपूर्वा (विद्या)'* (वामनः, २०२८, पृ. ५) इति। एतासां विद्यानां परिज्ञानं काव्यनिर्मितौ सहायकं भवति। शब्दस्मृतेरर्थाद् व्याकरणात् शब्दशुद्धिर्भवति। व्याकरणज्ञानेन कविः स्वकाव्ये साधुशब्दान् प्रयोक्तुं सामर्थ्यमेति। अभिधानकोशतः (शब्दकोशतः) पदार्थनिश्चयो भवति, येन कविः समीचीनपदानि निबद्धुं प्रभवति। सुकवित्वस्य कृते छन्दःशास्त्रज्ञानमपेक्ष्यते, तद्विना छन्दसां प्रयोगे संशयो जायते। तन्निवृत्तये (संशयनिवृत्तये) छन्दःशास्त्रपरिज्ञानमुपयुज्यते। कलातत्त्वज्ञानमन्तरा काव्ये कलावस्तु सम्यग् विरचयितुं न शक्यतेऽतः कलाशास्त्रज्ञानस्य महत्यपेक्षा। कामचारस्य परिज्ञानाय कामशास्त्रस्य बोध आवश्यकः। सन्धिविग्रहादिषड्गुणानां समुचितप्रयोगो नयस्तद्विपरीतोऽनयः कथ्यते। नयानयरूपज्ञानमन्तरेण काव्ये नायकप्रतिनायकगतव्यवहारं प्रदर्शयितुं न पार्यतेऽतो दण्डनीति(अर्थशास्त्र)ज्ञानेन काव्यरचनायां साहाय्यमधिगम्यते। नयानयरूपदण्डनीतिज्ञानेन काव्यशरीरभूतस्य वृत्तस्य वैचित्र्यं सम्पाद्यते। वामनमते 'प्रकीर्णाभिधाने हेतो लक्ष्यज्ञत्वमभियोगः। वृद्धसेवा, अवेक्षणम्, प्रतिभानम् अवधानञ्च परिगण्यन्ते। अन्यविरचितकाव्येषु परिचयो लक्ष्यज्ञत्वमुच्यते। काव्यावलोकनाभ्यासादेव काव्यविरचनायां शक्तिर्जायते। काव्यविरचनाय कृत उद्यमोऽभियोग उच्यते। स (अभियोगः) कवित्वोत्कर्षं विधत्ते। काव्यात्मकोपपदे सेवा वृद्धसेवाऽभिधीयते। ततः काव्यविधाया निपुणता (संक्रान्तिः) भवति। काव्यविरचन उपयुक्तपदानां ग्रहणेन तथाऽनुपयुक्तपदानां त्यागेन रचनासौन्दर्योपयोगित्वपरीक्षणमेवावेक्षणमस्ति। कवित्वस्य बीजं प्रतिभानम् (अर्थात् प्रतिभा) अस्ति। कवित्वबीजभूतं प्रतिभानं कश्चिज्जन्मान्तरागतसंस्कार विशेषोऽस्ति यस्माद्विना काव्यं न निष्पद्यते निष्पन्नं वा हास्यास्पदं भवति।

चित्तस्यैकाग्रताऽर्थाद् बाह्यार्थनिवृत्तिरवधानं कथ्यते। अवहितमर्थादेकाग्रं चित्तमभिनवपदार्थान् द्रष्टुं समर्थञ्जायते। वामनः कथयति यदुक्तमवधानं निर्जनदेशाद् रात्रेश्चतुर्थप्रहरकालाच्चाधिगन्तुं शक्यते। ब्राह्ममुहूर्त्तप्रभावाच्चित्तं लौकिकविषयेभ्यो विरक्तं सत्प्रसन्नतां याति। काव्यहेतुविषयके वामनमते वस्तुद्वयमुल्लेख्यमस्ति। प्रतिभानं (प्रतिभा) कवित्वबीजत्वेन मन्यमानोऽपि स काव्याङ्गत्रये प्रतिभामङ्गद्वयानन्तरमर्थाल्लोकविद्यानन्तरं तृतीये काव्याङ्गप्रकीर्णे स्थापितवान्। पुनरपरतः सोऽवधानं काव्यरचना सहायकत्वेनोरीकरोति। तन्मते एकाग्रचित्तो जन एवार्थवान् (काव्यवस्तूनि) साक्षात्कृत्य स्वकाव्ये तानि निबद्धुं प्रभवति । रुद्रटः स्वप्रणीतरुद्रटालङ्कारे कथयति यदसारपरित्यागात् (दोषत्यागात्) सारग्रहणात् (अलङ्कारोपादानात्) काव्यं चारुत्वमाधत्ते। अतः चारुकाव्यनिर्माणे शक्तिः, व्युत्पत्तिः, अभ्यासश्चाभीष्टाः - *तस्यासारनिरासात् सारग्रहणाच्च चारुणः करणे। त्रितयमिदं व्याप्रियते शक्तिव्युत्पत्तिरभ्यासः* (रुद्रटः, सन् १९६०,पृ. १२) इति ॥ शक्तिस्वरूपं प्रकाशयितुं स वक्ति यत् कवेः सुसमाहिते प्रतिपादनसमर्थानि पदानि झटित्येव प्रतिभान्ति, सा शक्तिरस्ति। वस्तुनो यद्वशाद्हृदयङ्गमौ नानाविधौ शब्दार्थौ प्रतिभासेते, सा शक्तिरित्यभिधीयते- मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य। अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः ॥ इति । इयमेव शक्तिर्दण्डिप्रभृतीनामाचार्याणां मते प्रतिभापदेनोक्ता। रुद्रटमते शक्तिर्द्विविधा भवति - सहजा, उत्पाद्या च। पुंसा सहोत्पन्ना सहजा (प्रतिभा) प्रशस्यतरा भवतीति रुद्रटाभिमतम्। तद्यथा- प्रतिमेत्यपरैरुदिता सहजोत्पाद्या च सा द्विधा भवति। पुंसा सह जातत्वादनयोस्तु ज्यायसी सहजा ॥ इति ॥ सहजा शक्तिर्न केवलं पुंसा सहोत्पन्नत्वादेव ज्यायसी; अपि तु सा स्वसंस्काराय केवलमभ्यासमपेक्षते न तूत्पत्त्यर्थमतः सा ज्यायसी। एतद्विपरीतमुत्पाद्या शक्तिस्तु महता कष्टेन जन्यतेऽतः सा न ज्यायसी- स्वस्यासौ संस्कारे परमपरं मृगयते यतो हेतुम्। उत्पाद्या तु कथञ्चिद् व्युत्पत्त्या जन्यते परमा ॥ इति ॥

रुद्रटविचार उचितानुचितत्वविवेको व्युत्पत्तीति पदेनोच्यते। अयं विवेकः (परिज्ञानम्) छन्दसो व्याकरणस्य, नृत्यादिविषयकभरतादिप्रणीतशास्त्रस्य, लोकेषु चराचरादिस्वरूपनियमबोधकलोकशास्त्रस्य नाममालापठित-पर्यायशब्दरूपपदानामभिधेयार्थविषयकप्रयोगनिश्चिततायाश्च ज्ञानाज्जायते। रुद्रटमते व्युत्पत्तिविवेचनमिदं संक्षेपतोऽस्ति, विस्तृता व्युत्पत्तिस्तु सर्वविषयज्ञानमेवास्ति। यतो हि संसारे नास्तीदृशः शब्दोऽर्थो वा यः काव्याङ्गत्वं न याति। अस्यायमेव भावो यत्काव्यविषयपरिधेर्बहिर्नास्ति किञ्चिदप्यस्मिन् संसारेऽतः काव्यविरचनायां सर्वज्ञताऽपेक्ष्यते। विस्तरतस्तु किमन्यत्तत इह वाच्यं न वाचकं लोके। न भवति यत्काव्याङ्गं सर्वज्ञत्वं ततोऽन्येषा' ॥ इति॥ शक्तिव्युत्पत्तिभ्यां साकमभ्यासोऽपि नितरामपेक्षणीयः काव्यविरचनाय। उक्तप्रतिभासम्पन्नस्य सर्वज्ञतामवाप्तस्य च कवेः कृत आवश्यकमिदं यत् स सुकविसन्निधानेऽहर्निशं काव्यरचनामभ्यसेत्। अधिगतसकलज्ञेयः सुकवेः सुजनस्य सन्निधौ नियतम्। नक्तं दिवमभ्यस्येदभियुक्तः शक्तिमान् काव्यम्॥ इति॥ ध्वन्यालोककारेण आनन्दवर्धनेन यद्यपि काव्यहेतुविमर्शो न कृतस्तथापि स प्रकारान्तरेण कवित्वनिर्माणे प्रतिभाया महत्त्वमङ्गीकरोत्येव। ध्वन्यालोकस्य चतुर्थ उद्योते प्रतिभामहिमानं मनसि निधाय स कथयति यच्चेत् प्रतिभागुणोऽस्ति कविपार्श्वे तर्हि, काव्यगतरमणीयार्थानां

समाप्तिर्न स्यात्। कविः प्रतिभाबलेनैव नवनवानर्थान् निबद्धं स्वकाव्ये नितरां क्षमतामवाप्नोति। अविद्यमानायां प्रतिभायान्तु नास्तीदृशं वस्तु कवौ, येन स चमत्कृतिमयं काव्यं विरचयितुं प्रभवेत् - *न काव्यार्थविरामोऽस्ति यदि स्यात्प्रतिभागुणः* (आनन्दवर्धनः, सन् १९९२, पृ. २०२) इति ॥ सत्स्वपि पुरातनकविप्रबन्धेषु यदि स्यात्प्रतिभागुणः। तस्मिन्त्वसति न किञ्चिदेव कवेर्वस्त्वस्ति। ध्वन्यालोकस्य तृतीयोद्योते षष्ठकारिकागतवृत्तौ ध्वनिकार आनन्दवर्धनः कथयति यत् शक्तेः (प्रतिभायाः) व्युत्पत्तेश्च न्यूनतायाः क्रमशो दोषद्वयं सम्भवति। प्रथमो दोषोऽस्ति अव्युत्पत्तिकृतो द्वितीयोऽस्त्यशक्तिकृतः। तन्मते प्रथमो दोषः शक्त्या (प्रतिभया) संवृतो न प्रतीयते। द्वितीयदोषस्तु काव्ये झटत्येव प्रतीयते। इदमेव तथ्यं द्रढयितुं तेनाधस्तनः परिकरश्लोक उद्धृतः। सन्दर्भेऽस्मिन् – *'अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः। यस्त्वशक्तिकृतो दोषः स झटित्येव भासते* (आनन्दवर्धनः, सन् १००२, पृ. ६०) इति ॥ अनेन काव्यसृष्टौ शक्ति (प्रतिभा)माहात्म्यं तेन स्फुटं प्रकाशितमिति वक्तुं सुकरम्। आचार्यमम्मटेन काव्यप्रकाशस्य प्रथमोल्लासे काव्यहेतुविषयको विशदो विचारो विहितः। काव्यहेतुमालक्ष्य स कथयति- *शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे* (मम्मटः, सन् २००७, पृ. ७) ॥ अर्थात् शक्तिः, निपुणता, अभ्यासश्च काव्यहेतुत्वं यान्ति। शक्तिं व्याख्यायता तेनोच्यते- यच्छक्तिः कवित्वबीजरूपः संस्कारविशेषोऽस्ति, यामन्तरा काव्यं न जायेत, तां (शक्तिं) विना चेज्जायेत दोषवैशिष्ट्याद् हास्यास्पदमेव स्यात्। *'शक्तिः कवित्वबीजरूपः संस्कारविशेषो यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्।* इति। एतेन सिद्धयति यच्छक्तिमता कविनैव चारुकाव्यं निर्मातुं शक्यते। शक्तिहीनेन कविना विरचितं काव्यं हास्यभाजनत्वमेव याति। मम्मटप्रतिपादितेयं शक्तिर्वस्तुतोऽन्याचार्याभिमता प्रतिभैव। शक्तिं कवित्वबीजरूपतयोक्त्वा मम्मटस्तस्या प्राधान्यमेवाङ्गीकरोति। द्वितीयश्च मम्मटाभिमतः काव्यहेतुरस्ति निपुणता। निपुणता पदार्थव्युत्पत्तिरिति मम्मटाभिमतम्। सा निपुणताऽथवा व्युत्पत्तिर्लोकशास्त्रकाव्यादिविमर्शाज्जायते। कारिकागतेन लोकेति पदेन स्थावरजङ्गमात्मकलोकवृत्तमपेक्ष्यते। शास्त्रेति पदेन पिङ्गलादिमुनिप्रणीतं काव्यवर्णादिनियमप्रख्यापकं छन्दःशास्त्रम्, पाणिनिप्रभृतिविरचितं व्याकरणशास्त्रम्, अमरसिंहादिरचितः कोषग्रन्थः नृत्यगीतादिचतुःषष्टिकला विषयका भरतादिविरचिता ग्रन्थाः, पुरुषार्थचतुष्टयविषयकं क्रमशो धर्मशास्त्रम्, अर्थशास्त्रम्, कामशास्त्रम्, मोक्षशास्त्रं च गजतुरगखड्गादिलक्षणग्रन्थाश्चाभिप्रेताः। एवमेव काव्यपदेन महाकविविरचितानि काव्यानि, आदिग्रहणादितिहासादिविषयकग्रन्थाश्चाभिमताः। मम्मटमते कस्मिँश्चित् कार्यसम्पादने पौनःपुन्येन प्रवृत्तिरभ्यास इत्युच्यते। सोऽभ्यासो वाल्मीकिकालिदासप्रभृतिमहाकवीनां काव्यमर्मज्ञानामाचार्याणाञ्चोपदेशेनाधिगन्तुं शक्यते तथा काव्यनिर्माणहेतुत्वं याति। मम्मटमत एतेषां त्रयाणां हेतुनां काव्यनिर्माणम्प्रति हेतुत्वं समुदितरूपेणैव जायतेऽर्थात् ते दण्डचक्रादिन्यायेन सम्मिलितरूपेणैव हेतुत्वमुपयान्ति, न तु तृणारणिमणिन्यायेन प्रत्येकं काव्यजनकता। कारिकागते हेतुरिति पद एकवचनप्रयोगस्यायमेवाभिप्रायः - *'त्रयः समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे हेतुर्न तु हेतवः"*(मम्मटः, सन् २००७, पृ. ८) इति। इत्थं मम्मटः शक्तिं निपुणताम् अभ्यासञ्चेति त्रितयं काव्यहेतुं मन्यते तथा तन्मते (त्रयोऽपि हेतवः) काव्यनिर्माणं प्रति सम्मिलितरूपेणैव हेतुतां यान्ति।

हेमचन्द्रस्य मते काव्यनिर्माणे प्रतिभैव प्रधानं कारणमस्ति। तन्मते नवनवोन्मेषशालिनी प्रज्ञेव प्रतिभा। अतः केवलं तस्या एव काव्यकारणत्वं समीचीनम् | व्युत्पत्तिरभ्यासश्च तस्याः (प्रतिभायाः) संस्कारकौ स्तः। प्रतिभाया अभावे व्युत्पत्त्यभ्यासौ निष्फलौ स्तस्तयोर्न कश्चिदुपयोगः- *'प्रतिभाऽस्य हेतुः'*। प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा अस्य काव्यस्येदं प्रधानं कारणम्। व्युत्पत्त्यभ्यासौ तु प्रतिभाया एवं संस्कारकौ वक्ष्येते। अत एव तौ काव्यस्य साक्षात्कारणं प्रतिभोपकारिणौ तु भवतः। दृश्यते हि प्रतिभाहीनस्य विफलौ व्युत्पत्त्यभ्यासौ' (हेमचन्द्रः, सन् १९८५, पृ. २२) इति। तन्मते प्रतिभाया भेदद्वयं भवति सहजा औपाधिकी च। तेन प्रतिभाभेदद्वयस्य स्वरूपमपि प्रदर्शितम्। यद्यपि स प्रतिभामेव मुख्यतः काव्यकारणं मन्यते, परन्तु तेन प्रतिभासंस्कारकत्वेनाभिमतयोर्व्युत्पत्त्यभ्यासयोरपि स्वरूपं प्रकाशितम् तद्विचारे लोकशास्त्रकाव्येषु निपुणता व्युत्पत्तिरित्युच्यते-लोकशास्त्र काव्येषु निपुणता व्युत्पत्तिः। लोकेति पदेन तेन लोकवृत्तम् शास्त्रेति पदेन व्याकरणशास्त्रादिकमभिप्रेतम्। कवेः काव्यज्ञस्य आचार्यस्य च शिक्षा काव्यनिर्माणे वारं वारं प्रवृत्तिमेव सोऽभ्यासत्वेनाङ्गीकरोति- काव्यविच्छिक्षया पुनः पुनः प्रवृत्तिरभ्यासः। काव्यं कर्तुं जानन्ति विचारयन्ति वा ये ते काव्यविदः काव्यसहृदयास्तेषां शिक्षया वक्ष्यमाणलक्षणया काव्यस्य पौनःपुन्येन प्रवृत्तिरभ्यासः। अभ्याससंस्कृता हि प्रतिभा काव्यामृतकामधेनुर्भवति। वाग्भटस्य मते केवलं प्रतिभैव काव्यकारणत्वं भजते। व्युत्पत्तिरभ्यासश्च प्रतिभायाः संस्कारकौ स्तः- *प्रतिभैव च कवीनां काव्यकरणं कारणम्। व्युत्पत्त्यभ्यासौ तस्या एवं संस्कारकौ* (वाग्भटः, सन् १९९०, पृ. ३०) इति ॥ वाग्भटमेवानुसरन् जयदेवः प्रतिभामात्रमेव काव्यहेतुतयाऽङ्गीकुर्वन् वदति यद् व्युत्पत्त्यभ्यासौ तां प्रतिभां तथैव पोषयतो यथा लताकारणं बीजं मृत्तिकाम्बुनी पोषयतः। प्रतिभैव श्रुताभ्याससहिता कवितां प्रति। हेतुर्मृदम्बुसम्बद्धबीजोत्पत्तिर्लतामिव (जयदेवः, सन् १९८८, पृ. ८) इति॥ पण्डितराज जगन्नाथमतानुसारेण प्रतिभैव केवलं काव्यनिर्माणस्य कारणमस्ति। तस्य च कारणं कविमता केवला प्रतिभा। तस्य मते काव्यरचनानुकूलशब्दार्थोपस्थितिरेव प्रतिभाऽस्ति - *'सा च काव्यानुकूलशब्दार्थोपस्थितिः"* (जगन्नाथः, २०३७, पृ. १६) इति। पण्डितराजेन प्रतिभायाः कारणत्वमपि विवेचितं रसगङ्गाधरे। तदनुसारं प्रतिभाकारणस्य भागद्वयमस्ति। प्रथमे भागेऽदृष्टन्तथा द्वितीये (भागे) व्युत्पत्त्यभ्यासौ च परिगण्यन्ते। अदृष्टं देवतामहापुरुषप्रसादादिजन्यं भवति। व्युत्पत्त्यभ्यासौ तु विदितावेव। पण्डितराजोऽदृष्टस्य वैविध्यात् प्रतिभाया अपि वैविध्यं स्वीकुरुते- 'क्वचिद्देवतामहापुरुषप्रसादादिजन्यमदृष्टम् क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकारणाभ्यासौ'। अदृष्टव्युत्पत्त्यभ्यासानां न मिलितकारणत्वं प्रतिभां प्रति। तौ (व्युत्पत्त्यभ्यासौ) विनाऽपि केवलमहापुरुषप्रसादादपि प्रतिभोत्पत्तिः- "न तु त्रयमेव। बालादेस्तौ विनाऽपि केवलान्महापुरुषप्रसादादपि प्रतिभोत्पत्तेः। राजशेखरेण स्वकाव्यमीमांसायां काव्यहेतुविषयमाधृत्य विमर्शो विहितः। यद्यपि स काव्यम्प्रति प्रतिभाव्युत्पत्योः पारस्परिकसमवेतत्वं श्रेयस्करं मनुते, तथा प्रतिभाव्युत्पत्तियुक्तः कविर्वास्तविकः कविरिति घोषयति, परन्तु काव्यहेतुविचारप्रसङ्गे स केवलां शक्तिमेव काव्यकारणत्वेनोरीकरोति। *"प्रतिभाव्युत्पत्ती मिथः समवेते श्रेयस्यौ'* इति। *'प्रतिभाव्युत्पत्तिमांश्च कविः कविरित्युच्यते, सा शक्तिः केवलं काव्यहेतुः"* (राजशेखरः, सन् १९८०, पृ. २०) इति। शक्तिमेव काव्यस्य प्रधानं कारणं मन्यमानः स समाधिमभ्यासञ्च शक्तेरुद्भासकत्वेन मन्यते। मनस एकाग्रता समाधिरित्युच्यते। तन्मते समाधिरान्तरिकप्रयत्नस्तथाभ्यासो

बाह्यप्रयत्नश्चास्ति। तावुभावपि शक्तिमुद्भासयतः। प्रतिभाव्युत्पत्तिभ्यां शक्तेर्विविधरूपेण विस्तारो जायते। प्रतिभाव्युत्पत्ती शक्तेरेव जायेते। शक्तिसम्पन्नपुरुष एवं प्रतिभा तिष्ठति तथा शक्तिमान् एव व्युत्पन्नो भवति- 'मनस एकाग्रता समाधिः। समाधिरान्तरः प्रयत्नो बाह्यस्त्वभ्यासः। तावुभावपि शक्तिमुद्भासयतः। विप्रसृतश्च स प्रतिभाव्युत्पत्तिभ्याम्। शक्तिकर्तृके हि प्रतिभाव्युत्पत्तिकर्मणो शक्तस्य प्रतिभाति शक्तश्च व्युत्पद्यते। अन्यैराचार्यैः शक्तिप्रतिभे समानेऽर्थे प्रयुज्यते। परन्तूक्तविचारणेत्थं प्रतिभाति यद् राजशेखर उभयोर्मध्ये भेदं कुरुते तथा शक्तेर्व्यापकेऽर्थे प्रतिभायाश्च सीमितार्थप्रयोगं विधत्ते। परन्तु स काव्यमीमांसायाः पञ्चमेऽध्याये व्युत्पत्तिविषयकविचारावसरे 'उचितानुचितविवेको व्युत्पत्तिः' इतीत्थं व्युत्पत्तिस्वरूपं समुद्घाट्य 'शक्तिशब्दश्चायमुपचरितः प्रतिभाने वर्तते' इति कथनद्वारा द्वयोरभेदं निरूपयन् शक्तिशब्दः प्रतिभोपचाररूपेणास्तीति मनुते। राजशेखरमतानुसारं 'या शब्दसमूहम् अर्थसमूहमलङ्कारशास्त्रमुक्तिमार्गन्तथान्यदपीदृशकाव्यपदार्थं हृदये प्रतिभासयति सा प्रतिभेति निगद्यते। प्रतिभाहोनस्य जनस्य पदार्थजातमपरोक्षमिव तथा प्रतिभावतः पुनरपश्यतोऽपि प्रत्यक्ष इवाभाति। या शब्दग्राममर्थसार्थमलङ्कारतन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति, सा प्रतिभा। अप्रतिभस्य पदार्थसार्थः परोक्ष इव, प्रतिभावतः पुनरपश्यतोऽपि प्रत्यक्ष इव। प्रतिभा द्विविधा - कारयित्री भावयित्री च। काव्यनिर्माण कवेरुपकारिका 'कारयित्रो' कथ्यते। कारयित्री प्रतिभाऽपि विविधा-सहजा, आहार्या, औपदेशिकी च। सहजा प्रतिभा जन्मान्तरसंस्काराज्जायते। आहार्या चेह जन्मसंस्कारादुत्पद्यते। औपदेशिकी च ग्रन्थतन्त्राद्युपदेशादुत्पन्ना भवति। कारयित्र्याः प्रतिभाया भेदमिदमाधृत्य कवीनां भेदत्रयं भवति- सारस्वतः, आभ्यासिक, औपदेशिकश्च। भावकस्य (आलोचकस्य) उपकर्त्री भावयित्री प्रतिभोच्यते, अर्थाद् यया प्रतिभया समालोचक: (पाठकः) कवेरभिप्रायं बोद्धुं प्रभवति, सा भावयित्री प्रतिभा। अनयेव प्रतिभया कविव्यापाररूपो वृक्षः फलति। एतां विना काव्यवृक्षो वन्ध्यतां गच्छति'। भावकस्योपकुर्वाणा भावयित्री सा हि कवेः श्रममभिप्रायं च भावयति। तया खलु फलितः कवेर्व्यापारतरुः। उपर्युक्तमतानि समालोच्य संक्षेपेणानया रीत्यावगन्तुं शक्यते यत्-काव्यहेतुरूपेण प्रतिभा सर्वैः स्वीकृताः। तदन्यतत्त्वञ्च कैश्चिदेव इति।

उपसंहारः

सर्वेषामालङ्कारिणामाचार्याणां मतं यदि विमृश्येत, तददें सुस्पष्टं भवेद् यत् प्रथमतो भामहेन प्रतिभा, व्युत्पतिः, अभ्यासश्चेति हेतुत्रितयमङ्गीकृतम्। तथैव दण्डी, रुद्रटः, मम्मटोऽपि काव्यहेतुत्रयं स्वीकृत्य तस्य (हेतुत्रयस्य) विमर्शं विहितवन्तः। हेमचन्द्रः, वाग्भटः, जयदेवश्चेमे त्रयोऽप्याचार्याः प्रतिभां मुख्यं हेतुं मत्वा अन्यौ द्वौ हेतू प्रतिभासहायकत्वेन स्वीकृतवन्तः। हेमचन्द्रस्य वाग्भटस्य च मतेऽपरौ हेतू प्रतिभासंस्कारत्वेन मतौ। जयदेवमते च तौ (हेतू) सहायकत्वेन निर्धारिती। अतो वक्तुं शक्यते यदेतेषामाचार्याणां मते साक्षात्प्रतिभैव काव्यहेतुत्वं भजते। अपरयोर्व्युत्पत्त्यभ्यासयोश्च हेतुभूतप्रतिभायाः साहाय्यमेव भवति। आनन्दवर्धनः पण्डितराजो जगन्नाथश्च केवलां प्रतिभां तथा राजशेखरः केवलां शक्तिञ्च काव्यकारणतया मानितवन्तौ। इदमत्र ध्येयं यदाचार्यद्वारा हेतुनामोल्लेखे वैविध्यं दृष्टिगोचरं याति। रुद्रटेन

मम्मटेन च प्रतिभापदस्थाने शक्तिपदं प्रयुक्तम्। सूक्ष्मपर्यालोचनेन वक्तुमिदं सुकरं यदेतेषामाचार्याणां मते शक्तिप्रतिभयोर्नास्ति भेदः केवलं राजशेखर एवेतादृश आचार्यो यन्मते शक्तिः प्रतिभया भिन्ना। काव्यहेतुविषयको वामनविचारस्तु विलक्षण एव। यत्र विलक्षणरीत्या काव्यहेतुर्विमृष्टः। वामनेन काव्यहेतुस्थाने काव्याङ्गशब्दं प्रयुज्य काव्यहेतुत्रितयं निरूपितम्। लोकः, विद्या, प्रकीर्णञ्च। लोकपदेनापेक्षितं लोकवृत्तं मम्मटादिप्रतिपादिते निपुणतादिनामके हेतौ समापतितम्। तस्य विद्याभिधानहेतुरपि तथैवाङ्गीकृतो यथाऽन्यैराचार्यैर्व्युत्पत्तिनामको हेतुरभिमतः। वस्तुतो वामनाभिमतो लोको विद्या चान्याचार्यप्रति पादितव्युत्पत्तिनामके हेतौ परिगणयितुं शक्येते। तत्प्रतिपादिते प्रकीर्णाभिधाने हेतौ प्रतिभानस्य (अर्थात् प्रतिभायाः) स्थानं निर्धारितम्। प्रतिभानमथवा प्रतिभां कवित्वबीजभूतत्वेन स्वीकृस्यापि वामनेन कथं गौणस्थाने स्थापित मिति विचारार्हम्। द्वितीयहेतुरूपेण भामहरुद्रटाभ्यां व्युत्पत्तिपदं दण्डिना श्रुतेति पदं तथा मम्मटेन निपुणतेति पदं प्रयुक्तम्। सम्यग् विचारेण तथ्यमिदमनायासेनैव समापतति समक्षमस्माकं यदस्मिन् सन्दर्भे प्रयुक्तश्रुतनिपुणताव्युत्पत्तिपदानि समानमेवाभिप्रायं वहन्ति। तृतीय हेतुत्वेनान्यैराचार्यैरभ्यासपदमङ्गीकृतम्, परन्तु दण्डिना वामनेन चाभियोगपदस्य प्रयोगो विहितः। अभ्यासाभियोगपदयोरभिप्रायः समान एव। उपर्युक्तसमेषामाचार्याणां मतसमीक्षणेन वक्तुमिदं युक्तं यत्काव्यविरचनायां प्रतिभायाः (शक्तेः) महती भूमिका अस्ति। नूनमेव तां विना समुत्कृष्टकाव्यं रचयितुं न शक्यते। अतः प्राधान्यं तस्याः निर्विवादम्, परन्तु ध्येयमिदं तथ्यमत्र यत् केवलं प्रतिभामात्रेण विरचितं काव्यं न सर्वाङ्गपूर्णतां याति। तदर्थं प्रतिभया साकं निपुणता अभ्यासश्चापि नितरामपेक्षितौ। अतो वक्तुमिदमापाततो सङ्गतं यत् काव्यहेतुत्वेन प्रतिभायाः (शक्तेः) स्वीकृतेऽपि प्राधान्येऽपरौ द्वौ समुद्धृतौ हेतू अपि नितान्तमपेक्षितौ। दशायामस्यामाचार्यमम्मटस्यायं विचारो याति सङ्गति यत् त्रयाणामपि हेतूनां काव्यरचनां प्रति समुदितं (सम्मिलित) हेतुत्वं न तु व्यस्तहेतुत्वम्। अत एव तेन काव्यहेतुबोधिकायां कारिकायां हेतुपदस्यैकवचनत्वं प्रयुक्तम् *'इति हेतुस्तदुद्भवे'* (मम्मटः, सन् २००७, पृ. ७)। अतः काव्यहेतुविषये विचारिते सति मम्मटाचार्यप्रस्तुतं काव्यहेतुचिन्तनं युक्तियुक्तमिति संगच्छते।

कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कातर्ज्ञ्यं व्यनज्मि।

सन्दर्भग्रन्थसूची

आनन्दवर्धनः. (सन् १९९२). *ध्वन्यालोकः*. वाराणसीः चौखम्बा विद्याभवन।

जगन्नाथः. (२०३७). *रसगङ्गाधरः*.वाराणसीः सम्पूर्णानन्दविश्वविद्यालय।

जयदेवः. (सन् १९८८). *चन्द्रालोकः*. वाराणसीः भारतीय विद्या संस्थान।

दण्डी. (२०२८). *काव्यादर्शः*. वाराणसीः चौखम्बा विद्याभवन।

भामहः. (२०४२). *काव्यालङ्कारः*. पटनाः विहार राष्ट्रभाषा परिषद्।

मम्मटः. (सन् २००७). *काव्यप्रकाशः*. वाराणसीः चौखम्बा विद्याभवन।

राजशेखरः. (सन् १९८०). *काव्यमीमांसा*. वाराणसीः चौखम्बा सुरभारती।

रुद्रटः. (सन् १९६०). *काव्यालङ्कारः*.वाराणसीः चौखम्बा विद्याभवन।

वाग्भटः.(सन् १९९०). *वाग्भटालङ्कारः*. वाराणसीः चौखम्बा विद्याभवन।

वामनः. (२०२८). *काव्यालङ्कारसूत्रम्*. वाराणसीः चौखम्बा संस्कृत सीरिज।

हेमचन्द्रः. (सन् १९८५). *काव्यानुशासनम्*. वाराणसीः चौखम्बा विद्याभवन।